संस्कृत-वार्ता:

18.03.2024

सायम् - 06:20

मुख्यवार्ता:

- स्टार्टअप महाकुम्भ अद्य नवदिल्ल्या: भारतमण्डपम् इत्यत्र समारब्धम्।
- तेलंगनाया: जगितयाले नैवाचिकीं जनसभां सम्बोधयन् श्रीमोदी उक्तवान् यत् भाजपादलं तेलंगाना-क्षेत्रीय-जनानाम् आकांक्षा: पूरायितुं वचनबद्धमस्ति।
- सर्वोच्चन्यायालयेन दिल्ल्याः पूर्वमन्त्री सत्येन्द्रजैनस्य मोचनयाचकेति अस्वीकृता।
- रूस देशस्य राष्ट्रपित: व्लादिमीर-पुतिन: पञ्चम-कार्यकालाय राष्ट्रपति-निर्वाचने एतिहासिकं विजयम् अधिवातवान्।
- भारत-ऋतु-विज्ञान-विभागेन अद्य जम्मू-कश्मीरे, लद्दाखे, हिमाचलप्रदेशे, उत्तराखण्डे च वृष्टेः हिमपातस्य च संभावना प्रकटिता।

स्टार्टअप/महाकुम्भ:

स्टार्टअप महाकुम्भ अद्य नवदिल्ल्या: भारतमण्डपम् इत्यत्र समारब्धम्। कार्यक्रमोऽयं अस्य मार्च मासस्य विंशति: दिनांकं यावत् प्रचलिष्यति। अस्मिन् आयोजने विभिन्न स्टार्टअप इत्यस्य विभिन्न-मण्डपा: भविष्यन्ति। येषु ए.आई., बीटूबी, एग्रीटेक, डीपटेक, क्लाईमेट टेक्, गेमिंग, ई-स्पोर्टस, फिटनेस सदृशा: नैके मण्डपा: सम्मिलिता: सन्ति। अस्य महाकुम्भस्य उद्देश्यं पूंजीपतिनां निवेशकानां च भारतीय-व्यापारेण सह संयोजनम् अस्ति। उद्योग-सम्वर्धन-आन्तरिक-व्यापार-विभागस्य सचिवेन राजेश कुमार-सिंहेन उक्तं यत् भारतं तृतीय: सर्वाधिक बृहत्तम: स्टार्टअप इति तन्त्रस्य देश: अस्ति। अपि च देशे सम्प्रति स्टार्टअप इति एकलक्षाधिका: सन्ति। यो हि षोडशोत्तर-द्विसहस्रतमे वर्षे स्टार्टअप-इण्डिया-उपक्रमस्य आरम्भे केवलं त्रिशतं यावदेव आसीत्। तेनोक्तं यत् पञ्चाशत् प्रतिशत-तोप्यधिका: स्टार्टअप द्वितीय श्रेण्या: तृतीय श्रेण्या: नगरेभ्य: सन्ति। स्टार्टअप इत्यस्मिन् डीपटेक् अपि च अनुसंधान-विकासयो: महत्वे प्रवदता श्री सिंहेनोक्तं यत् आगामि मासेषु एकं भिन्नं समर्पितं च डीपटेक-स्टार्टअप नीतये अन्तिमं रूपं प्रदीयते। अस्मिन् अवसरे भारतस्य जी-विंशति: शेरपा अमिताभकान्तेनोक्तं यत् स्टार्टअप-इण्डिया-योजनाया: आगमनानन्तरं देशे स्टार्टअप इत्यस्य संख्यायां उल्लेखनीय:-वृद्धि: जात:। तेनोक्तं यत् पारिस्थितिकीय-तन्त्रेण विगतेषु अष्टवर्षेषु दशलक्षाधिका: वृत्यावसरा: एककोटितोप्यधिका: अप्रत्यक्ष-वृत्यवसरा: सृजिता:। अस्माकं वार्ताहरेण ख्यापितं

यत् अस्मिन् महाकुम्भे द्विसहस्राधिका: स्टार्टअप, त्रिंशतसहस्रं यावत् भाविन: उद्यमिन:, पञ्चाशत्-सहस्राणि यावत् उद्योग-आगन्तुका:, दशदेशानां प्रतिनिधिमण्डलानि च भागं भजिष्यन्ते।

<u>भाजपा-तैलंगाना</u>

वरिष्ठ-भाजपा-नेता एवम् प्रधानमन्त्री नरेन्द्र मोदी उक्तवान् यत् दक्षिणीय-राज्येषु राष्ट्रीय-जनतान्त्रिक घठबन्धनस्य एन.डी.ए. इत्यस्य पक्षे उत्साहोऽस्ति। तेलंगनाया: जगित्याले अद्य एकां नैर्वाचिनीकीं जनसभां सम्बोधयन् श्रीमोदी उक्तवान् यत् भाजपादलं तेलंगाना-क्षेत्रीय-जनानाम् आकांक्षा: पूरायितुं वचनबद्धमस्ति। तेन उक्तं यत् जगतियालस्य जनसभायां एकत्रित: जनसागर: स्पष्टतया संकेतं ददाति यत् वायु: कस्याम् दिशि प्रवहति।

<u>कर्नाटक-शिव मोग्गा</u>

श्री मोदी अद्य कर्नाटकस्य शिवमोग्गा इत्यत्र एकां जनसभां संबोधयिष्यति। शिवमोग्गा भारतीय-जनता-पार्टीति दलस्य शीर्षस्थस्य नेतु: बी.एस.येदियुरप्पा अस्य गृहं-जनपद: अस्ति। यस्य ज्येष्ठ: पुत्र: बी.वाई. राघवेन्द्र-शिवमोग्गा निर्वाचन-क्षेत्रे वर्तमान: सांसद: अस्ति। जनसभा समये बी.एस.येदियुरप्पामतिरिच्य राज्यस्य अन्ये वरिष्ठा: नेतार: मञ्चे चर्चां करिष्यन्ति।

<u>सर्वोच्चन्यायालय: / सत्येन्द्र जैन:</u>

सर्वोच्चन्यायालयेन अद्य धनशोधनप्रकरणे दिल्ल्याः पूर्वमन्त्री सत्येन्द्रजैनस्य मोचनयाचिकेति अस्वीकृत्य तत्क्षणं आत्मसमर्पणाय उक्तम्। न्यायाधीश बेला एम त्रिवेदी अपिच न्यायाधीश पंकज मिथल: इत्येतयोः पीठेन सत्येन्द्रजैनस्य याचिका अस्वीकृता। न्यायालयेन अन्याभियुक्तयोः- अंकुश-वैभवजैनायो च मोचनयाचिका अपि अस्वीकृता। जैनस्य अधिवक्तुः मौखिकानुरोध: शीर्षन्यायालयेन अस्वीकृत: यस्मिन् सः एकसप्ताहस्य आभ्यन्तरे आत्मसमर्पणं कर्तुं शक्नोति इति निर्दिष्टम् आसीत्। सत्येन्द्रजैनेन गतवर्षस्य मई-मासस्य षड्विंशे दिनाङ्के चिकित्साकारणात् षट् सप्ताहानां कृते अन्तरिममुक्तेः अनुमतिः प्राप्ता आसीत्, तदनन्तरं च समये समये तस्य अवधिः विस्तारित:।

प्रधानमंत्री पुतिन:-पंचमंवारम्

रूस देशस्य राष्ट्रपित: व्लादिमीर-पुतिन: पञ्चम-कार्यकालाय राष्ट्रपति-निर्वाचने एतिहासिकं विजयम् अधिगतवान्। अशीति-प्रतिशत-प्राप्तानां मतानां गणनासु स: सप्ताशीति-प्रतिशतं मतानि प्राप्तवान् । अनेन सहैव स: षड्वर्षस्य कार्यकालाय राष्ट्रपति: भविता। राष्ट्रपति-निर्वाचिने कम्यूनिस्ट दलस्य अभ्यर्थी निकोलाई खारितोनोक् द्वितीय-स्थाने नवीनश्च अभ्यर्थी व्लादिस्लाव-दावानकोव: तृतीय-स्थाने सन्ति।

आई.एम.डी.

भारतीय-ऋतु-विज्ञान-विभागेन अद्य जम्मू-कश्मीरे, लद्दाखे, हिमाचलप्रदेशे, उत्तराखण्डे च वृष्टेः हिमपातस्य च संभावना प्रकटिता। महाराष्ट्र-मध्यप्रदेश-छत्तीसगढ-राज्यानां केषुचित् भागेषु नारङ्ग वार्णिकी सञ्चेतना प्रसारिता। आईएमडी इत्यनेन उक्तं यत् अद्य मध्यप्रदेशस्य, छत्तीसगढस्य, विदर्भस्य, झारखण्डस्य च केषुचित् भागेषु वज्रपातः, विद्युत्, तीव्रवायुः च दृश्यन्ते। आगामिदिनद्वये तेलङ्गाना-आन्ध्रप्रदेशस्य, उत्तर-पूर्वीय-भारतस्य च केषुचित् भागेषु निम्न-मध्यमवृष्टिः, हिमपातः, विद्युद् द्योतनम् च सम्भवन्ति।

सर्वोच्च न्यायालय: एसबीआई

सर्वोच्च-न्यायालय: भारतीय-स्टेट-बैंक-एसबीआई वित्तागारम् अद्य नैर्वाचनिक-बन्धप्रपत्रेण सम्बद्धानां समस्तानां विवरणानां सूचना-प्रदानाय निर्देशं दत्तवान्। सर्वोच्च-न्यायालय: एस-बी-आई वित्तागारं मार्च-मासस्य एकविंशति-दिनांकं यावत् क्रेतृणां प्राप्तकर्तृणां च राजनैतिक-दलानां मध्ये संपर्कं दर्शयितुं विशिष्ट-बन्ध-प्रपत्र-संख्यानां सूचनां प्रदातुमपि उक्तवान्। सर्वाच्च-न्यायालय: एस.बी.आई. इत्यस्य अध्यक्षं सायं पञ्चवादनं यावत् न्यायालयस्य समक्षे एकं शपथ-प्रपत्रं पञ्जीकर्तुंमुक्तवती उक्तवान्।

निर्वाचन-आयोग:

लोकसभानिर्वाचनात् पूर्वं निर्वाचनआयोगेन अद्य अधिकारिणां बृहत्स्तरे स्थानान्तरणाय आदेशः प्रदत्तः। आयोगेन पश्चिमबङ्गस्य आरक्षी महानिदेशकं समेत्य षट् राज्याणां गृहसचिवा: अपि निष्कासिता:। सूत्रानुसारी गुजरातस्य, उत्तरप्रदेशस्य, बिहारस्य, झारखण्डस्य, हिमाचल प्रदेशस्य, उत्तराखंडस्य च गृहसचिवाः स्थानन्तरिताः। मिजोरम-हिमाचलप्रदेशयोः सामान्यप्रशासनिकविभागस्य सचिवौ अपि स्थानान्तरितौ। तदतिरिक्तं बृहन्मुम्बईनगरपालिकायुक्तस्य इकबालसिंहचहलस्य अपि च अतिरिक्तायुक्तानां उपायुक्तानां च स्थानान्तरणस्य आदेशो निर्वाचनायोगेन प्रदत्त:।

प्रधानमन्त्री/ जम्मू-कश्मीर

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् श्रीनगरस्य डलसरोवरस्य तटे आयोजितं प्रथमं फार्मूला-4 इति कारयान-प्रदर्शनं जम्मू-कश्मीरस्य सौन्दर्यस्य प्रदर्शने इतोप्यधिकं साहाय्यं भविष्यति। एकस्मिन् सामाजिकान्तर्जाल-संदेशे श्री मोदिना उक्तं यत् भारतं मोटरस्पोर्ट्स् इत्यस्य समृद्धेः अवसरं प्रददाति तथा च श्रीनगरं तेषु स्थानेषु शीर्षे अस्ति यत्र एतत् भवितुम् अर्हति। ह्यः श्रीनगरस्य डलसरोवरस्य तटे प्रथमवारं फार्मूला-4 इति कारयान-प्रदर्शनम् अभवत् ।

महिला-प्रीमीयर-लीग:

महिलानां क्रिकेट्-प्रीमीयर-लीग-प्रतिस्पर्धायां रॉयल-चैलेंजर्स-बेंगलुरू-दलेन गतरात्रौ डेल्ही-कैपिटल्स-दलं अष्ट स्तोभै: दिल्ल्या: अरूण-जेटली-क्रीडांगणे पराजितम्। प्रतिस्पर्धायाम् अस्यां डेल्ही-कैपिटल्सदलेन पणकं विजित्य वल्लक्रीडनं स्वीकुर्वता चतुर्दशाधिकैकशतं धावनांका: निर्मिता:। लक्ष्यम् अनुसरता रॉयल-चैलेंजर्स-बेंगलुरू-दलेन क्रीडकद्वयस्यैव हानिपुरस्सरं पञ्चदशधिकैकशतं धावनांकान् स्थापियत्वा स्पर्धेयं विजिता।

।। इति वार्ता: ।।